|| मृतसञ्जीवन स्तोत्रम् ||

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।

मृतसञ्जीवनं नाम्ना कवचं प्रजपेत् सदा ||१||

सारात्सारतरं पुण्यं गुह्यात्गुह्यतरं शुभम् ।

महादेवस्य कवचं मृतसञ्जीवनामकम् ||२||

समाहितमना भूत्वा शृणुश्व कवचं शुभम् ।

शृत्वैतद्दिव्य कवचं रहस्यं कुरु सर्वदा ||३||

वराभयकरो यज्वा सर्वदेवनिषेवितः ।

मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ||४||

दधानः शक्तिमभयां त्रिमुखं षड्भुजः प्रभुः ।

सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ||५||

अष्टादशभुजोपेतो दण्डाभयकरो विभुः ।

यमरूपी महादेवो दक्षिणस्यां सदावतु ||६||

खड्गाभयकरो धीरो रक्षोगणनिषेवितः ।

रक्षोरूपी महेशो मां नैऋत्यां सर्वदावतु ||७||

पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।

वरूणात्मा महादेवः पश्चिमे मां सदावतु ||८||

www.totalbhakti.com

गदाभयकरः प्राणनायकः सर्वदागतिः ।

वायव्यां वारुतात्मा मां शङ्करः पातु सर्वदा ।।९।।

शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।

सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ।।१०।।

शूलाभयकरः सर्वविद्यानामधिनायकः ।

ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ।।११।।

ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माऽधः सदावतु ।

शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ।।१२।।

भ्रूमध्यं सर्वलोकेशस्त्रिणेत्रो लोचनेऽवतु ।

भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ।।१३।।

नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।

जिव्हां मे दक्षिणामूर्तिर्दन्तान्मे गिरिशोऽवतु ।।१४।।

मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः ।

पिनाकि मत्करौ पातु त्रिशूलि हृदयं मम ।।१५।।

पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।

नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतिपतिः ।।१६।।

कटद्वयं गिरिशौ मे पृष्ठं मे प्रमथाधिपः ।

गुह्यं महेश्वरः पातु ममोरु पातु भैरवः ।।१७।।

जानुनी मे जगद्धर्ता जङ्घे मे जगदंबिका ।

www.totalbhakti.com

पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ||१८||

गिरिशः पातु मे भार्या भवः पातु सुतान्मम ।

मृत्युञ्जयो ममायुष्यं चित्तं मे गणनायकः ||१९||

सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।

एतत्ते कवचं पुण्यं देवतानांच दुर्लभम् ||२०||

मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।

सहस्त्रावर्तनं चास्य पुरश्चरणमीरितम् ||२१||

यः पठेच्छृणुयानित्यं श्रावयेत्सु समाहितः ।

सकालमृत्यु निर्जित्य सदायुष्यं समश्नुते ||२२||

हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।

आधयोव्याधयस्तस्य न भवन्ति कदाचन ||२३||

कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।

अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ||२४||

युद्धारम्भे पठित्वेदमष्टाविंशतिवारकम ।

युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ||२५||

न ब्रह्मादिनी चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।

विजयं लभते देवयुद्धमध्येऽपि सर्वदा ||२६||

प्रातरूत्थाय सततं यः पठेत्कवचं शुभम् ।

अक्षय्यं लभते सौख्यमिहलोके परत्र च ||२७||

www.totalbhakti.com

सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः ।

अजरामरणो भूत्वा सदा षोडशवार्षिकः ।।२८।।

विचरत्यखिलान् लोकान् प्राप्य भोगांश्च दुर्लभान् ।

तस्मादिदं महागोप्यं कवचं समुदाहृतम् ।।२९।।

मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम् ।

मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम् ।।३०।।

।। इति वसिष्ठकृतं मृतसञ्जीवन स्तोत्रम् ।।

www.totalbhakti.com